न चाप्योभन्त पण्यानि नापचन् गृहमेधिनः ॥")
व्यवहार्य्यम् । स्तोतव्यम् । इति पणधात्वर्थदर्श-
नात् ॥ (क्ली, पण्यते व्यवह्रियतेऽत्र । पण+
यत् । विपणिः । यथा, मनुः । ५ । १२९ ।
"नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् ॥"
"पण्यं पण्यवीथिकायाम् ।" इति कुल्लूकभट्टः ॥)

पण्यवीथिका, स्त्री, (पण्यानां विक्रेयद्रव्याणां वीथिका गृहम् ।) विपणिः । इत्यमरः ।२।२।२॥ पण्यविक्रयशाला । इति हलायुधः ॥ हट्टः । इत्यन्ये ॥ विक्रयार्थप्रसारितनानाद्रव्याणां वणिग्वीथी । वाणियाविही इति बाजार इति च ख्यातः । इति केचित् । हट्टमण्डपः । इति केचित् । हट्टमध्यस्थपण्यविक्रयवीथी । इति केचित् । इति तट्टीकायां भरतः ॥
"आपणः पण्यवीथी च द्वयं वीथीति संज्ञितम्॥"
इति शाश्वतः ॥

पण्यवीथी, स्त्री, (पण्यानां वीथी विक्रयगृहम् ।) क्रयविक्रयस्थानम् । इति शब्दमाला ॥

पण्यशाला, स्त्री, (पण्यानां विक्रेयद्रव्याणां शाला गृहम् ।) हट्टः । इति हेमचन्द्रः ॥ विक्रयगृहञ्च ॥

पण्यस्त्री, स्त्री, (पण्या मूल्येन लभ्या या स्त्री । यद्वा पण्ये हट्टादिस्थले स्थिता स्त्री ।) वेश्या । इति कोषान्तरम् ॥

पण्या, स्त्री, (पण्यते स्तूयते रोगहन्तृत्वात् । पण ङ व्यवहारे स्तुतौ च + कर्म्मणि यत् ततष्टाप् ।) पिण्या । इति द्विरूपकोषः ॥

पण्याङ्गना, स्त्री, (पण्या पण्येन मूल्येन लभ्या या अङ्गना ।) वेश्या । इति हेमचन्द्रः ॥

पण्याजीवः, पुं, (पण्यैः क्रयविक्रयद्रव्यैराजीवति प्राणिति । आ + जीव + कः ।) क्रयविक्रयिकः । वणिक् । इत्यमरः । २ । ९ । ७८ ॥

पण्याजीवकं, क्ली, (पण्यैः क्रयविक्रयद्रव्यैराजीवति तिष्ठतीति । पण्याजीवस्ततः स्वार्थे कन् । अभिधानात् क्लीवत्वम् । यद्वा, पण्याजीवैर्वणिग्भिः कायति शब्दायते इति । कै + कः ।) हट्टः । इति त्रिकाण्डशेषः ॥ पण्यजीवकमित्यपि पाठः ॥

पण्यान्धा, स्त्री, (पण्यं अन्धयति स्वगुणेन या । अन्ध + अच् ।) तृणविशेषः । तत्पर्य्यायः । कङ्गुनीपत्रा २ पण्यधा ३ पणधा ४ । अस्या गुणाः । समवीर्य्यत्वम् । तिक्तत्वम् । चारत्वम् । सारकत्वम् । तत्कालशस्त्रघातव्रणसंरोपणत्वञ्च ।
"दीर्घा मध्या तथा ह्रस्वा पण्यान्धा त्रिविधा स्मृता ।
रसवीर्य्यविपाकेषु मध्यमा गुणदायिका ॥"
इति राजनिर्घण्टः ॥
पण्यन्धा इत्यपि पाठः ॥

पत् [द्] पुं, (पद्यते गच्छत्यनेन । पद्यौ ङ गतौ + करणे क्विप् ।) पादः । इत्यमरः । २ ।६ ।७१॥ (यथा, मनुः । ४ । २०७ ।
"मत्तक्रुद्धातुराणाञ्च न भुञ्जीत कदाचन ।
केशकीटावपन्नञ्च पदास्पृष्टञ्च कामतः ॥"
केचित्तु पादशब्दस्य पद् इत्यादेशो भवतीति वदन्ति । अन्येस्तत् न मन्यन्ते अतः "पदादयः पृथक्शब्दा इत्येके ।" इति मुग्धबोधे वोपदेवेनोक्तम् ॥)

पत, ऌ ज गतौ । ऐश्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) ऌ, अपतत् । ज, पातः पतः । गतिरिह पतनम् । पतति पर्णं वृन्तात् । इति दुर्गादासः ॥

पत, त् क गतौ । ऐश्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-अकं-सेट् ।) ऐश्यमिश्वरीभावः । गतिरिह पतनम् । पतयति पत्रं वृन्तात् । इति दुर्गादासः ॥

पत, य ङ ऐश्ये । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-अकं-सेट् ।) य ङ, पत्यते । ऐश्यमैश्वर्य्यमिश्वरीभावः । इति दुर्गादासः ॥

पतं, त्रि, (पततीति । पत् + अच् ।) पुष्टम् । इति जटाधरः ॥ (पतनकर्त्तरि च, त्रि ॥)

पतगः, पुं, (पत उत्पतितः सन् गच्छति । यद्वा पतेन पक्षेण गच्छतीति । गम् + डः ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ (यथा, मनुः ।७।२३।
"देवदानवगन्धर्व्वा रक्षांसि पतगोरगाः ।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः ॥")

पतङ्गं, क्ली, (पत् ऌ गत्यैश्वर्य्ययोः । बाहुलकात् अङ्गच् ।) सूतम् । पारदम् । इति मेदिनी ॥ चन्दनभेदः । इति शब्दचन्द्रिका ॥

पतङ्गः, पुं, (पतति गच्छतीति । "पतेरङ्गच् पक्षिणि ।" उणां । १ । ११८ । इति अङ्गच् ।) पक्षी । (यथा, मार्कण्डेये । १० । ८९ ।
"ततः सर्व्वेषु निस्तीर्णः पापी तिर्य्यक्त्वमश्नुत ।
क्रिमिकीटपतङ्गेषु श्वापदे मशकादिषु ॥")
सूर्य्यः । (यथा, माघे । १ । १२ ।
"पतत्पतङ्गप्रतिमस्तपोनिधिः
पुरोऽस्य यावन्न भुवि व्यलीयत ॥"
"कथं पतङ्गः सूर्य्यः । खगत्वसामान्योपचारात् ।
'पतङ्गः शलभे सूर्य्ये पतङ्गः पक्षिणि स्मृतः ॥'
इति कोषान्तरम् ॥" इत्युज्ज्वलदत्तः ॥)
शलभः । इत्यमरः । ३ । ३ । २० ॥ शालिप्रभेदः । इति मेदिनी ॥ जलमधूकवृक्षः । इति राजनिर्घण्टः ॥

पतङ्गमः, पुं, (पत उत्पतितः सन् गच्छतीति । गम् + खच् । मुम् च ।) पक्षी । इति व्याकरणम् ॥ (शलभः । यथा, भागवते । ७ । ८ ।२४।
"अलक्षितोऽग्नौ पतितः पतङ्गमो
यथा नृसिंहौजसि सोऽसुरस्तदा ॥")

पतङ्गिका, स्त्री, (पतङ्ग + स्वल्पार्थे संज्ञायां वा कन् । स्त्रियां टाप् अत इत्वञ्च ।) मधुमक्षिकाविशेषः । तत्पर्य्यायः । पुत्तिका २ । इत्यमरः । २ । ५ । २७ ॥ (यथा, महाभारते । १ । १०८ । १० ।
"पतङ्गिकानां पुच्छेषु त्वयेषीका प्रवेशिता ।
कर्म्मणस्तस्य ते प्राप्तं फलमेतत्तपोधन ! ॥")

पतञ्चिका, स्त्री, (पतमभिगतं शत्रुमित्यर्थः चिक्रयति पीड़यति स्वारोपितशरेणेति यावत् । पृषोदरात् साधुः ।) धनुर्ज्या । इति शब्दरत्नावली ॥

पतञ्जलिः, पुं, (पतः पतन् वा अञ्जलिः नमस्कार्य्यतया यस्मिन् । शकन्ध्वादित्वात् साधुः ।) मुनिविशेषः । स तु पातञ्जलदर्शनपाणिनिटीकामहाभाष्यादिग्रन्थकर्त्ता । तत्पर्य्यायः । गोनर्दीयः २ । इति हेमचन्द्रः ॥ चूर्णिकृत् ३ भाष्यकारः ४ । इति त्रिकाण्डशेषः ॥ वररुचिः ५ । इति शब्दरत्नावली ॥ (केषाञ्चिन्मते योगसूत्रकारकपतञ्जलेर्भाष्यकृत् पतञ्जलिर्भिन्न एव । अनयोरभेदतान्तु निर्दिशन्ति पाश्चात्याः ॥ पातञ्जलयोगशास्त्रन्तु पादचतुष्टयात्मकं तत्र प्रथमे पादे "अथ योगानुशासनम् ।" इति योगशास्त्रारम्भप्रतिज्ञां विधाय "योगश्चित्तवृत्तिनिरोधः ।" इत्यादिना योगलक्षणमुक्त्वा सप्रपञ्चसमाधिर्निर्द्दिष्टं कृतवान् भगवान् पतञ्जलिः । द्वितीये तु "तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ।" इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च वहिरङ्गाणि साधनानि च निरदिशत् । तृतीये "देशबन्धश्चित्तस्य धारणा ।" इत्यादिना धारणाध्यानसमाधित्रयरूपमन्तरङ्गं संयमपदवाच्यं तत्र अवान्तरफलं विभूतिजातञ्च उपदिदेश । चतुर्थे पादे तु "जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ।" इत्यादिना ससिद्धिपञ्चकं मुख्यं प्रयोजनं कैवल्यं प्रधानादीनि पञ्चविंशतितत्त्वानि क्लेशकर्म्मविपाकाशयैरसंश्लिष्टं पुरुषं स्वेच्छया निर्म्माणकायमधिष्ठाय लौकिकादिसम्प्रदायप्रवर्त्तकं संसारदहने दग्धानां जीवानां निस्तारकञ्च उपदिष्टवान् ॥)

पतत्त्रं, क्ली, (पतन्तं त्रायते इति । पतत् + त्रै + कः ।) पक्षः । पाखा इति भाषा । इत्यमरः । २ ।५।३६। (यथा, भागवते ।८।११।३४।
"येन मे पूर्व्वमद्रीणां पक्षच्छेदः प्रजात्यये ।
कृतो निविशतां भारैः पतत्त्रैः पततां भुवि ॥"
(त्रं) पत ऌ गतौ । "अमिनक्षियजिवधिपतिभ्योऽत्रन् ।" उणां । ३ । १०५ । इति अत्रन् । वाहनम् । इत्युज्ज्वलदत्तः ॥)

पतत्त्री, [न्] पुं, (पतत्त्रं पक्षो विद्यतेऽस्य । पतत्त्र + इनिः ।) पक्षी । इत्यमरः ।२।५।३३॥ (यथा, कुमारे । ५ । ४ ।
"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्त्रिणः ॥")

पतत्रिः, पुं, (पतति उत्पततीति । "पतेरत्रिन् ।" उणां । ४ । ६९ । इति अत्रिन् ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥

पतद्ग्रहः, पुं, (पतत् मुखादिभ्यः स्खलत् जलादि गृह्णातीति । पतत् + ग्रह + अच् ।) प्रतिग्राहः । इत्यमरः । २ । ३ । १३९ ॥ पिकदानी इति भाषा ॥

पतद्भीरुः, पुं, (पतन् पक्षी भीरुर्यस्मात् ।) श्येनः । इति शब्दरत्नावली ॥

पतन् [त्] पुं, (पततीति । पत् + शतृ ।) पक्षी । (यथा, महाभारते । २ । ३८ । २८ ।
"नक्षत्राणां मुखं चन्द्र आदित्यस्तेजसां मुखम् ।